International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(4): 96-98
© 2025 IJMH
www.themultijournal.com
Received: 14-08-2025
Accepted: 23-08-2025
Publish : 25-08-2025

**डॉ. प्रीतमसिंहः**
अतिथिशिक्षकः, दर्शनविभागः
सनातनधर्म-आदर्शसंस्कृतमहा-,
विद्यालयः, डोहगी, ऊना ,
हिमाचलप्रदेशः-174307.

**Correspondence:**
**डॉ. प्रीतमसिंहः**
अतिथिशिक्षकः, दर्शनविभागः
सनातनधर्म-आदर्शसंस्कृतमहा-,
विद्यालयः, डोहगी, ऊना ,
हिमाचलप्रदेशः-174307.

# गान्धी-विवेकानन्ददर्शनयोः सामाजिकयोगदानम्

**डॉ. प्रीतमसिंहः**

प्रेक्षणार्थे दृश् धातोर्ल्युटप्रत्ययेन दर्शनपदस्य निष्पत्तिर्भवति । 'ल्युट्' प्रत्ययकरणार्थे भावार्थे, अधिकरणार्थे च भवति । अतः 'दर्शनम्' इति पदस्य व्युत्पत्तिस्तु इत्थं वर्त्तते -

**करणार्थे - 'दृश्यतेऽनेन इति दर्शनम्'** । अत्र 'अनेन' इति पदं करणार्थेऽस्ति । अत्र करणं किमस्ति? तदा कथ्यते कमपि पदार्थं प्रति दर्शनक्रिया चक्षुषा भवति । परञ्च चक्षुषा यदि तस्य पदार्थस्य सम्यग्ज्ञानम्, अवबोधनं वा भवति तन्नाम तु दर्शनम् । अतः ज्ञानचक्षुषा यत्किञ्चिदपि सम्यग्ज्ञानं भवति तत्तु दर्शनमिति। अत्र करणं सम्यग्ज्ञानमस्ति, यत्र संशयस्य कोऽपि विचारो न भवतीति।

**भावार्थे** - भावपस्य अर्थोऽस्ति सत्ता विद्यमानता वा । संसारेऽस्मिन् अनेके जनाः सन्ति येषां पार्श्वे नास्ति नेत्रदृष्टिः, तेषामपि दर्शनानि भवन्ति । तेषां कृते तु अखिलजगति पदार्थानां सत्ता वर्त्तते । यदि स्वप्नेऽपि यत् दृष्टम्, तस्यापि जाग्रतावस्थायां तथैव भावो न वर्त्तते, परञ्च स्वप्नदृष्टानां पदार्थानां सत्ता विद्यमानता वा संसारेऽस्मिन् भवति । अतः भावार्थेऽपि दर्शनपदस्य व्युत्पत्तिरस्ति **'दृश्यते इति दर्शनम्'** ।

**अधिकरणार्थे** - 'दृश्यते अस्मिन् इति दर्शनम् । अर्थात् ज्ञानविज्ञाने यत्किञ्चिदपि दृश्यते, तन्नाम तु दर्शनम्।

अतः शब्दोऽयं संस्कृतस्य प्रेक्षणार्थकाद् दृश् धातो (दृशिर् प्रेक्षणे) ल्युट् प्रत्यये अनादेशे च कृते 'दर्शनम्' इति सिद्धम् । 'प्रेक्षण' शब्दस्य अत्र अभिधेयमर्थमस्ति - येन प्रकृष्टरूपेण अन्तर्दृष्टया वा दृश्यते ।

'दर्शनम्' इत्यस्य आङ्गलपदम् Philosophy इति भवति । इदं च Philosophy इति युनानी (Greek) Philos, Sophia इति पदद्वाभ्यां निष्पन्नम् । यस्य अर्थः - Philos = Love, Sophia = Wisdom भवति, एवञ्च सारांशरूपेण वदामः चेत् 'Love is Wisdom' 'विद्यानुरागः' (विद्यां प्रति अनुरागः) इति दर्शनस्य अर्थो भवति ।

The word 'Philosophy' is derivied form greek language, there in this greek language the word 'Philosophy' is a combination of two woeds - Philos = Love, Sophia = Wisdom, so love of wosdom is known as Philosophy.

दर्शनं समाजस्य दर्पणं भवति विद्यायामस्यां काऽपि अतिशयोक्तिर्न भवति, अपि तु यथार्थस्य ज्ञानं भवति। कस्यापि पदार्थस्य साक्षाद् ज्ञानमेव समाजाय, राष्ट्राय विश्वाय च लाभकारि भवति । यथा साहित्यमपि समाजस्य दर्पणं मन्यते, परञ्च साहित्ये रससहितं कस्यापि सामाजिकसमस्यायाः समाधानं भवति, तत्र हासपरिहासार्थमपि अधिकं बन्धनं न भवति । परञ्च दर्शनशास्त्रन्त्वधिकं गहनगभीरं शास्त्रमस्ति ।

वस्तुतः समस्यासमाधानाय दर्शनशास्त्रस्योदयो भवति । समाजे तु नैकाः समस्याः विद्यमानाः विद्यन्ते। तेषां सर्वविधसमस्यानां समाधानं प्राचीनेषु साङ्ख्य-योग-वैशेषिक-न्याय-मीमांसा-वेदान्त-जैन-बौद्ध-चार्वाकादिषु दर्शनेषु विद्यत एव, परञ्च भाषाशैल्याः गभीरत्वादेतेषां ग्रन्थानामध्ययनं सर्वेभ्यः सुलभं नास्ति । परञ्च समास्यानां समाधानन्त्वश्येव करणीयम् ? तर्हि समस्याः दृष्ट्वा नैकेः समाजसुधारकजनैः स्वविचारान् समाजे प्रसरणं कृतम् ।

एतत्फलस्वरूपं 1900 ईस्वीतः 2100 ईस्वीपर्यन्तं नैकाः दार्शनिकाः सन्ति, येषां दार्शनिकविचारैः समाजेऽशुभविचाराणां नाशान्तरं सर्वेषां मनसि शुभविचाराणामगमनमभवत् । एतेषां सङ्क्षेपेण विवेचनमग्रलिखितमस्ति -

1. गान्धीदर्शनम्
2. विवेकानन्ददर्शनम्

**1. गान्धीदर्शनम् -**

मोहनदासकर्मचन्दगाँधी कमपि दर्शनग्रन्थं न रचितवान्, अपि तु तस्य विचाराणां यो दार्शनिकाधारोऽस्ति स एव गाँधीदर्शननाम्ना ज्ञायते । स्वतन्त्रतासङ्ग्रामे अस्य महद्योगदानमस्ति । अस्य महोदयस्य विचाराः स्वतन्त्रतापूर्वमथ च पश्चाद् यादृशा प्रभावयुक्ता आसन्, तद्वदेवाधुनाऽप्यस्ति नास्त्यत्र लेशमात्रमपि सन्देहः ।

गाँधीविचारैरुत्पन्नं दर्शनमास्तिकं दर्शनमस्ति, हि परलोके अस्य विश्वासः अस्ति । आस्तिकनास्तिकपदयोः स्वरूपम् **'अस्ति नास्ति दिष्टं मतिः'**[1] इति सूत्रेण ठक्-प्रत्ययेन (अस्ति+ठक्) आस्तिकः, एवञ्च (नास्ति+ठक्) नास्तिकः इति अनयोर्द्वयोः पदयोर्निर्माणमभवत् । पदों का निर्माण होता है । अनयोः पदयोर्व्युत्पत्तिं कुर्वन् शब्दानुशासनकारो महर्षिपाणिनिर्निगदति - **'अस्ति परलोके मतिः यस्य स आस्तिकः'** एवञ्च **'नास्ति परलोके मतिः यस्य स नास्तिकः'** अर्थात् यः परलोकसत्तायाम् विश्वसति स आस्तिकः, अथ च यः परलोकसत्तायां न विश्वसति स नास्तिको भवति । एवं गाँधीदर्शनमास्तिकमिति स्वीक्रियते ।

**गाँधीदर्शने ईश्वरः -**

गाँधीदर्शने ईश्वरस्य स्थानमतिविशिष्टमस्ति यथा वैशेषिकन्याय-दर्शनयोः ईश्वरः सृष्टेः कर्त्ता-धर्त्ता-हर्त्ता-नियन्तारूपेण अङ्गीक्रियते तद्वदेवास्मिन् गाँधीदर्शनेऽपि ईश्वरस्य स्वरूपं स्वीक्रियते। गाँधीमतानुसारमयं शिवमयः, सत्यमयः चिन्मय ईश्वर एव सृष्टेर्मूलमस्ति । गाँधीवाक्यमस्ति ईश्वरसन्दर्भे यत् यथा अहं स्वस्थूल-रूपं पश्यामि तद्वदेव अहं जगतो मूले श्रीरामं पश्यामि । अस्य कथनस्य पुष्टिस्तदाऽधिकं भवति यदा अन्तकाले तस्य मुखात् 'हे राम!' इति उच्चारणमासीत् । अत्र रामपदेन रामायण श्रीरामः अभिप्रेयते परञ्च दार्शनिकदृष्ट्या रम्यते सर्वशरीरेषु इति रामः अर्थात् परमात्मा सर्वविधेषु शरीरेषु रमति तस्मात् स आत्मा (परमात्मा) एव रामः ।

वैशैषिकन्याययोरपि परमात्मैव अदृष्टत्वात् परमाणुषु सञ्चालनं कृत्वा जीवस्य सृष्टिं करोति । यथोक्तम् - ईश्वरः कारणं पुरुषकर्मा-फल्यदर्शनात् ।[2] तत्कारित्वादहेतुः ।[3] अक्षपाद् वैशेषिकन्यायमतरोर-नुसरणं गाँधीदर्शनात् दृश्यते निश्चयेन ।

**समाजे गाँधीदर्शनस्य योगदानम् -**

गाँधीदर्शनस्य मुख्यत्वं अहिंसासत्ययोः पालनमस्ति । अस्य दर्शन-स्य चिन्तनानुसारं मानवः सर्वदा सत्यं वदेत्, नानृतम् । वस्तुतः असत्यभाषणादप्यहिंसा भवति, अतः सर्वथा सर्वदा चाहिंसा न करणीया अथ च सर्वकालेषु सर्वदेशेषु च सत्यं वदेत् । 'सत्यं शिवं सुन्दरम्' इति वचनानुसारं यः सत्यं वदति स कल्याणं सामर्थ्यञ्चाप्नोति । समाजे अधुना सत्यभाषणस्य अहिंसापालनस्य च महती आवश्यकता अस्ति । हिंसाबलेन समाजे क्रूरप्रवृत्तीनां विकासो भवति, सर्वत्र आतङ्कभावस्य बाहुल्यता भवति । असत्यबलेन स-माजे ध्वंसो जायते, चरित्रहानिश्च भवति । अत एव समाजे अंहि-सायाः सत्यानुपालनस्य च भावना गाँधीदर्शनेन प्रतिष्ठिता भवति । महर्षिपतञ्जलिकृते योगदर्शने अहिंसासत्ययोः लक्षणानि तेषां फलानि च विवेचितानि । यथा –

**अहिंसा -** तत्र किं नाम अहिंसा ? इत्यस्मिन् विषये योगसूत्रे प्रतिपादितम् - **'सर्वथा सर्वदा सर्वभूतानामनभिद्रोहः अहिंसा ।'**[4] सर्वेषु प्राणिमात्रेषु द्वेष-घृणाभावनाविमुक्तो भाव एवाहिंसा । अहिंसा जाति-देश-काल-आचारपरम्पराभिरनवच्छिन्ना भवति ।[5] यथा तीर्थ एव जीवहिंसा करिष्यामि नान्यथेति दैशिकहिंसा । चतुर्दशीदिवसे अथवा कस्मिन्नपि पवित्रदिवसे (दीपावली-ईद-होली-क्रिशमस-गुरुपर्वादिषु) जीवहिंसा न करिष्यामीति कालिकहिंसा । मत्स्य-पालकमतानुसारेण मत्स्यव्यतिरिक्तस्य कस्यापि जीवस्य हननं न कृत इयं जातिहिंसा भवति । देवताभ्यो ब्रह्मणेभ्यो वा कृता जीवहिंसा आचारपरम्पराहिंसा उच्यते । जैनदर्शने हिंसाया लक्षणविषये कथितं यद् प्रमत्तयोगेन प्राणानां वध एव हिंसा।**'प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा'**।[6]

**अहिंसाफलम् -** अहिंसानुष्ठानेन प्राणिसानिध्यात् सर्वप्राणिनः प्रति वैरत्यागो भवति ।[7]

यथा ईशावास्योपनिषद्यपि कथितम् -

**'यस्तु सर्वाणि भूतानि आत्मनि एव अनुपश्यति ।**
**सर्वभूतेषु च आत्मानं ततः न विजुप्सते ॥'**[8]
**'यस्मिन् सर्वाणि भूतानि आत्मा एव अभूत् विजानतः ।**
**तत्र कः मोहः कः शोक एकत्वम् अनुपश्यतः ।।'**[9]

अर्थात् अहिंसाबलेन सर्वप्राणिषु सर्वत्र एकस्यैवात्मनो दर्शनं भवति येन विश्वोऽयं सर्वपापेभ्यो विमुक्तो भूत्वा शान्तिमधिगच्छति ।

**सत्यम् -** सत्यविषये योगसूत्रे कथितम् - सत्यं यथार्थ वाङ्गमनसे । यथा दृष्टं, यथा अनुमितं, यथा श्रुतं तथा वाङ्मनश्च ।[10] साङ्ख्य-योगदर्शनयोः त्रीणि प्रमाणानि सन्ति । अतस्तेषां प्रमाणानामनुसृत्य यथाज्ञानं भवति तथैव वाङ्मनश्च सत्यमुच्यते ।

गाँधीवचनानुसारमसत्यस्य लक्षणं कर्त्तुं शक्यते यत् यदसद्वदन-मनृतम्। तत्र किन्नाम असद् एतस्मिन् विषये लिखितं विद्यमान-पदार्थस्य निषेधः, अविद्यमानपदार्थस्य स्वीकरणम् एवञ्च विद्यमान-पदार्थस्य अन्यस्वरूपे कथनम् असद् भवति । परञ्च व्यवहारे सत्यं कथं कदा च वनदीयमिदमपि महत्त्वपूर्णमस्ति । कदापि कटुसत्यन्न वदनीयं येन परेषामहिंसा भवति । यथा कोऽपि अन्धजनं दृष्ट्वा भो! अयमन्धः अयमन्ध इति न वदनीयः । तस्य कृते 'प्रज्ञाचक्षुः अयं जनः' इति वाक्यं प्रोक्तव्यम् ।

अभिप्रायोऽस्ति यत् परत्र स्वबोधसङ्क्रान्तये वागुक्ता सा यदि न वा वञ्चिता भ्रान्ता वा प्रतिपत्तिबन्ध्या वा भवेदिति । एषा सर्वभूतो-पकारार्थं प्रवृत्ता न भूतोपघाताय । यदि चैवमप्यभिधीयमाना

भूतोपघातपरैव स्यान्न सत्यं भवेत्, पापमेव भवेत् । कटुसत्यवदनेन कस्यापि अहिंसा न भवेदेतस्मादस्ति अहिंसाया यमेषु व्रतेषु वा प्रथमस्थानम् ।

आचार्यमनुवचानानुसारेणापि अयमेव भावो वर्णितः -

**'सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रुयात्सत्यमप्रियम् ।**

**प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ॥'**[11]

**सत्यफलम् -** सत्यानुष्ठानेन सत्यवादी जनः क्रियाफलस्य आश्रयो भवति ।[12]

गाँधीदर्शनानुसारं जीवने सादगी अतीवमहत्त्वपूर्णा अस्ति । वर्त्तमाने भौतिकयुगे सर्वे जनाः स्वपरिवेशमुच्चकरणाय नैकानि अनर्थकानि कार्याणि कुर्वन्ति । अधिमात्रायां शुल्कमपि आपणतः स्वीकुर्वन्ति येन देशस्य अर्थव्यवस्थायां महती हानिर्भवति । समाजे रोजगारावसराः न्यूनाः भवन्ति । समाजे युववर्गेषु रोजगाराऽभावात् विचारशून्यता आयाति येन देशस्य गरिमारक्षणे देशः असमर्थो भवति । परञ्च गाँधीदर्शनस्य अस्य सादगी-सिद्धान्तस्य अक्षरशः अनुपालना क्रियते चेत् एतादृशाः समस्याः न भविष्यन्ति ।

**2. विवेकानन्ददर्शनम् -**

**आदर्शस्य वर्णनञ्च कियत् शब्दैः तु शक्यते ।**

**ब्रह्मत्वञ्च मनुष्याणामाचारे तत् प्रकाशनम् ।।**

अर्थात् मम आदर्शवाक्यं तु अल्पेषु शब्देष्वेव वक्तुं शक्यते परञ्च मम मुख्यमुद्देश्यन्तु मानवाय तस्य स्वरूपविज्ञानार्थं ज्ञानप्रकाशस्य प्रसारोऽस्ति इति विवेकानन्दस्य आदिवचनमस्ति । तस्य विचारैः प्रतीयते यत् स आस्तिक आसीत्, तस्य च दर्शनम् आस्तिक-दर्शनमस्ति। ईश्वररूपे स शिवं स्वीकरोति तस्य च वाचकः स ओमिति एतदक्षं स्वीकरोति यथा योगदर्शने अपि ईश्वरस्य वाचकः प्रणवः (ओम्) इति स्वीक्रियते ।[13] स स्वभाषणे वारं वारमग्र-लिखितानां श्लोकानां मन्त्राणां वा प्रयोगः करोति स्मः -

**प्रणवो धनुः शारो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते। ।**
**तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुः॥**
**भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।**
**क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥**
**हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम्।**
**तच्छुभ्रं ज्योतिषं ज्योतिस्तद् यदात्मविदो विदुः॥**
**ब्रह्मैवेदममृतं पुरस्ताद् ब्रह्म पश्चाद् ब्रह्म दक्षिणतश्चोत्तरेण ।**
**अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥**

एतैर्मन्त्रोच्चारणैर्ज्ञायते यत् तस्य मनः आध्यत्मिकज्ञानाय रोचते स्मः। अध्यात्मस्य जीवनेऽतिमहत्त्वपूर्णस्थानमस्तीति तस्य विचार आसीत्।

**समाजे विवेकानन्ददर्शनस्य योगदानम् -** स्वामीविवेकानन्दः स्वराष्ट्रस्य सन्दर्भे सर्वदा चिन्तनलग्न आसीत् । तस्य काले राष्ट्रे विध्यमानां समस्याम् दृष्ट्वा विवेकानन्दः सर्वदा चिन्तनं कुर्वन् आसीत्, परञ्च मनसि विश्वासोऽप्यासीद्यदेकस्मिन् दिवसे सर्वविधस-मस्यानां निराकरणं भविष्यति तथा भारतस्य ज्ञानपताका विश्वे अवश्यमेव आकाशस्य स्पर्शं करिष्यति । अनेनैव विश्वासेन स विदेशे स्वराष्ट्रस्य हिन्दुत्वं स्थापितवान् । हिन्दुत्वसन्दर्भे सर्वविध-विचारधारा तस्यैव युवावर्गणानुपालनीया । वस्तुतः विवेकानन्देन पुनः हिन्दुत्वे जागरणं कृतं नास्ति अत्र विप्रतिपत्तिः ।

तत्कालीनराष्ट्रे विद्यमानानां बालविवाह-जातिप्रथा-पर्दाप्रथा-सती-प्रथादीनां सर्वविधविकासावरोधकानां तत्त्वानां विरोधं कृत्वा समाजं एतैरवरोधकैर्विमुक्तः कारितवान् । स्वामीविवेकानन्दः विद्यार्थीनां निमित्तं परमप्रेरणादायको वर्त्तते । वस्तुतः सर्वविद्यार्थीनां कृते अयं विवेकानन्द आदर्शो विद्यते । विद्यार्थिनिमित्तं तस्य वाक्यमेकं प्रसिद्धमस्ति यत् - 'उतिष्ठ जाग्रत श्रं करोतु यावत् लक्ष्यं नाप्नोति' वाक्यमिदं कठोपनिषदि प्राप्यते । समाजस्य सर्ववर्गेभ्यः शिक्षार्थं स निम्नश्लोकस्य प्रयोगः करोति स्मः -

**आहार-निद्रा-भय-मैथुनश्च सामान्यम् एतद्पशुभिर्नराणाम्।**

**धर्मो हि तेषाम् अधिको विशेषः धर्मेण हीनः पशुभिः समानः ॥**

अत एव निष्कर्षोऽयमस्ति यत् विवेकानन्ददर्शनं न केवलं भारतवर्षाय अपि तु समस्तविश्वायातिमहत्त्वपूर्णमग्रहणीयञ्चास्ति ।

**सन्दर्भ**


1. महर्षिपाणिनिः, अष्टाध्यायी-4.4.60

2. अक्षपाद् गौतम, न्यायसूत्र, 4.1.19,

3. गौतम, न्यायसूत्र, 4.1.21

4. योगसूत्रम्, 2.30 (व्याख्या- व्यासभाष्यम्)

5. योगसूत्रम्, जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम् । 2.31

6. तत्त्वार्थसूत्रम्, 7.13

7. अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः । (सर्वप्राणिनां भवति ।) 2.35

8. ईशावास्योपनिषत्, 6

9. ईशावास्योपनिषत्, 7

10. योगसूत्रम्, 2.30 (व्याख्या- व्यासभाष्यम्)

11. मनुस्मृतिः,

12. सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम् । योगसूत्रम्, 2.36

13. क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः । महर्षि-पतञ्जलि,योगसूत्र,1.24